नलदस्तु:, पुं, विष्णुरूप: । इति भूरिप्रयोग: ॥

नलदा, स्त्री, ( नलद+टाप् । ) जटामांसी । इति हेमचन्द्र: ॥

नलपट्टिका, स्त्री, ( नलनिर्म्मिता पट्टिका । ) नलास्त्री । इति हारावली । १७७ ॥ दरमा इति भाषा ॥

नलमीन:, पुं, ( नलाश्रयो मीन: । ) चिलिचिम-मत्स्य: । इत्यमर: । १ । १० । १८ ॥ ( "नल-मीन: कषायाक:" इति हारीते प्रथमे स्थाने ११ अध्याये ॥ )

नलिका, स्त्री, ( नल इव आकारोऽस्त्यस्या इति । नल+ठन् । ) नाड़ी । नली इति ख्यात: । सा च उत्तरापथे प्रसिद्धा सुगन्धा प्रवाला-कृति: प्रवालीति क्वचित् प्रसिद्धा । पँठारी इति क्वचित् प्रसिद्धा । तत्पर्य्याय: । विद्रुम-लतिका २ कपोतचरणा ३ नलिनी ४ निर्म्मध्या ५ सुषिरा ६ धमनी ७ सुन्वा ८ रक्तदला ९ नर्त्तकी १० नटी ११ । अस्या गुणा: । तिक्त-त्वम् । कटुत्वम् । तीक्ष्णत्वम् । मधुरत्वम् । क्रमिवातोदराध्मानशूलनाशित्वम् । मलशोध-नत्वञ्च । इति राजनिर्घण्ट: ॥ तन्नामगुणा: ।

"नलिका विद्रुमलता कपोतचरणा नटी ।
धमन्यञ्जनकेशी च निर्म्मध्या सुषिरा नली ॥
नलिका शीतला लघ्वी चक्षुष्या कफपित्तनुत् ।
कृच्छ्राश्मवातहृच्छ्वासकुष्ठकण्डूज्वरापहा ॥"
इति भावप्रकाश: ॥

(अस्त्रविशेष: । यथा, आर्य्यासप्तशत्याम् । ४३७ ।
"मधुमथनवदनविनिर्गतवंशीसुषिरानुसारिणो रागा: ।
हन्त हरन्ति मनो मम नलिकाविशिखा: स्मर-स्येव ॥"

इयं हि आकृतिक्रियादिना आधुनिकनला-स्त्रस्य 'वन्दूक' इति ख्यातस्य सादृश्यं गच्छति । यथा, वैशम्पायनीयधनुर्व्वेदे ।

"नलिका ऋजुदेहा स्यात्तन्वङ्गी मध्यरन्ध्रिका ।
मर्म्मच्छेदकरी नीला———————॥"
"ऋजुत्वं भापनश्चैव सूक्ष्मत्वेति गतित्रयम् ।
तामाश्रितं विदित्वा तु जेतव्यान् रिपून् युधि ॥"

अस्या विशेषविवरणन्तु नालिकाशब्दे द्रष्टव्यम् ॥ कृत्रिमजलनिर्गमपथ: । यथा, यन्त्रविधि-शतके १ अध्याये ।

"वेदाङ्गुलं सम्मुखोर्द्ध्वं कार्य्यं तोयस्य धारणे ।
समर्था तत्र नलिका कुर्य्यात्तोयविमोचनीम् ॥")

नलित:, पुं, ( नल्यते इति । नल ज बन्धे+क्त: । ) शाकविशेष: । नालिता इति भाषा ॥ अस्य गुणा: । मधुरत्वम् । पित्तनाशित्वम् । शुक्र-वहकत्वञ्च । इति द्रव्यगुण: ॥

नलिनं, क्ली, ( नल्यते इति । नल बन्धे+"वञ्जुल-मन्यत्रापि ।" उणा । २ । ४९ । इति इनच् ।) पद्मम् । इत्यमर: । १ । १० । ३९ ॥ ( यथा, भागवते । २ । ६ । २२ ।

"यदास्य नाभ्यान्नलिनादहमासं महात्मन: ।
नाविदं यज्ञसम्भारान् पुरुषावयवानृते ॥" )

नीलिका । जलम् । इति हेमचन्द्र: । ४ । २२६ ॥

नलिन:, पुं, ( नल+इनच् । ) सारसपक्षी । इत्य-मर: । १ । १० । ४० ॥ क्षणपाकफल: । इति शब्दचन्द्रिका ॥ पानीआमला इति भाषा ॥

नलिनी, स्त्री, ( नलानि पद्मानि सन्त्यत्र । नल+ "पुष्करादिभ्यो देशे ।" ५।२।१३५ । इति इनि: । ङीप् । ) पद्मयुक्तदेश: । ( नलानां पद्मानां समूह: । "खलादिभ्य: इनिर्वक्तव्य: ।" ४।२।५१। इत्यस्य वार्त्तिकोक्त्या इनि: ।) पद्मसमूह: । पद्म-लता । इति भरत: ॥ (अस्या: पर्य्यायो यथा,—

"नलिनी स्यात् पङ्कजिनी बिशिनी च सरोजिनी ।
पद्मिनीति च पर्य्याय: पद्मषण्डे तदाकरे ॥"
इति वैद्यकरत्नमालायाम् ॥ )

पद्ममात्र । इति रायमुकुटादय: ॥ तत्-पर्य्याय: । बिसिनी २ पद्मिनी ३ । इत्यमर: । १ । १० । ३९ ॥ ( यथा, अमरुशतके । ८ ।

"रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पद्मजालम् ।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥")

व्योमनिम्नगा । ( इयन्तु गङ्गाया: पूर्व्वदिग्गत-शाखानामन्यतमा । यथा, मात्स्ये । १२० । ४० ।

"तीणि प्राचीमभिमुखं प्रतीचीं त्रीण्यथैव च ।
स्रोतांसि त्रिपथगायास्तु प्रत्यपद्यन्त सप्तधा ॥
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा ॥")

कमलाकर: । इति मेदिनी । ने, ८२ ॥ नलिका । इति राजनिर्घण्ट: ॥ नारिकेलसुरा । इति त्रिकाण्डशेष: ॥ ( वामनासिका । यथा, भाग-वते । ४ । २५ । ४८ ।

"नलिनी नालिनी च प्रागद्वारावेकत्र निर्म्मिते ॥"
"नलनालशब्दौ छिद्रवचनौ तद्वती नलिनी नालिनी च वामदक्षिणनासिके ॥" इति तट्टी-कायां स्वामी ॥ )

नलिनीरुहं, क्ली, ( नलिन्यां रोहतीति । रुह+ क: । ) मृणालम् । इति राजनिर्घण्ट: ॥ ब्रह्मणि, पुं ॥

नलिनेशय:, पुं, ( नलिने शेते इति । शी+अच् ।) विष्णु: । इति त्रिकाण्डशेष: ॥

नली, स्त्री, ( नल+अच् । गौरादित्वात् ङीष् । ) मन:शिला । इति विश्व: ॥ नलिका । इति भाव-प्रकाश: ॥ तत्पर्य्याय: । सुषिरा २ विद्रुमलता ३ कपोताङ्घ्रि: ४ नटी ५ । इत्यमर: । २ । ४ । १२९ ॥ ( एतद्गुणा मन:शिलानलिकाशब्दयो: ज्ञातव्या: ॥)

नलोत्तम:, पुं, ( नलेषु उत्तम: । ) देवनल: । इति राजनिर्घण्ट: ॥

नल्व:, पुं, ( नल्यते इति । नल+उल्वादयश्चेति व: ।) किष्कुचतु:शतम् । चतु:शतहस्तपरिमित-देश: । इत्यमरभरतौ ॥ ( यथा, हरिवंशे । २२४ । १ ।

"तस्यां सभायां दैत्येन्द्रो हिरण्यकशिपुस्तदा ।
आसीन आसने चित्रे नल्वमात्रे प्रमाणत: ॥")

नल्ववर्त्मगा, स्त्री, (नल्वपरिमितं वर्त्म गच्छतीति । गम+ड: । ) काकाङ्गी । इति शब्दचन्द्रिका ॥ नल्वपरिमितपथगामिनि, त्रि ॥

नव, [ न् ] त्रि, ( नूयते स्तूयते प्रधानसंख्या-वाचकत्वेन । णु स्तवने+बाहुलकात् कनिन् गुणश्च । इत्युज्ज्वलदत्त: । १ । १५६ ।) संख्या-विशेष: । ९ नय इति भाषा । बहुवचनान्तो-ऽयम् । इति व्याकरणम् ॥ (यथा, रघु: । ३।६९।

"इति क्षितीशो नवतिं नवाधिकां
महाक्रतूनां महनीयशासन: ॥" )

नववाचका यथा । अङ्कहारम् १ भूखण्डम् २ कृतरावणमस्तक: ३ सुधाकुण्डम् ४ वाणी-स्तन: ५ सेवधि: ६ अङ्कम् ७ रस: ८ ग्रह: ९ । इति कविकल्पलता ॥ ( तद्वति, त्रि । यथा, मनु: । ३ । २६९ ।

"षण्मासान् छागमांसेन पार्षतेन च सप्त वै ।
अष्टावैणस्य मांसेन रौरवेण नवैव तु ॥" )

नव:, पुं, ( णु शि स्तवने+"ऋदोरप् ।" ३।३।५७। इति भावे अप् । ) स्तव: । इति मेदिनी । वे, १५ ॥ रक्तपुनर्नवा । इति राजनिर्घण्ट: ॥

नव:, त्रि, (नूयते स्तूयते इति । णु स्तुतौ+"ऋदो-रप् ।" ३ । ३ । ५७ । इति अप् । ) नूतन: । इत्यमर: ।३।१।७७॥ (यथा, हितोपदेशे ।१।२३४।

"न स्त्रीणामप्रिय: कश्चित् प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम् ॥" )

अभिनवान्यौषधानि प्रशस्तानि । यथा,—

"द्रव्याण्यभिनवान्येव प्रशस्तानि क्रियाविधौ ।
ऋते घृतगुडक्षौद्रधान्यकृष्णाविडङ्गत: ॥"
इति नारायणदासकृतवैद्यपरिभाषा ॥

तद्वैदिकपर्य्याय: । "नवम् १ नूतम् २ नूतनम् ३ नव्यम् ४ इदा ५ इदानीम् ६ । षट् नवनामानि ।" इति वेदनिघण्टौ ३ अध्याय: ॥

नवकारिका, स्त्री, ( नवं करोतीति । कृ+ण्वुल् । टापि अत इत्वम् । ) नवोढ़ा । इति शब्द-माला ॥ नूतन: संक्षिप्तो विवरणश्लोक: । नवीन-कार्य्यौ च ॥

नवकालिका, स्त्री, ( नवं कलति प्राप्नोतीति । कल+ण्वुल् । टाप् । अत इत्वम् । ) नवीन: । इति हारावली । १७६ ॥

नवग्रहा:, पुं, ( नव ग्रहा: । ) सूर्य्यादयो नव । यथा, तिथितत्त्वे ।

"नवग्रहमखं कृत्वा तत: कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ॥"
( यथा च,—
"सूर्य्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पति: ।
शुक्र: शनैश्चरो राहु: केतुश्चेति नवग्रहा: ॥")

तेषां संस्थानम् । यथा,—

"भूमेर्योजनलक्षे तु सौरं मैत्रेय ! मण्डलम् ।
लक्षे दिवाकरस्यापि मण्डलं शशिन: स्थितम् ॥
पूर्णे शतसहस्रे तु योजनानां निशाकरात् ।